# स्वप्नवासवदत्तम्

प्रथमोऽङ्कः

**तीर्थोदकानि समिधः कुसुमानि दर्भान्**

**स्वैरं वनादुपनयन्तु तपोधनानि ।**

**धर्मप्रिया नृपसुता न हि धर्मपीडा-**

**-मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥६॥**

**अन्वय-** तीर्थ उदकानि, समिधः, कुसुमानि(च) दर्भान् तपोधनानि, स्वैरम् वनात् उपनयन्तु, हि धर्मप्रिया(एषा) नृपसुता तपस्विषु धर्मपीडाम् न इच्छेत् । एतत् अस्याः कुलव्रतम्(अस्ति) ।

**अनुवाद-** तीर्थों के जल, समिधाएँ, पुष्प(और) कुशा आदि तपस्या के साधन स्वेच्छानुसार वन से ले आवें, क्योंकि धर्म के प्रति अनुराग रखने वाली, यह राजकुमारी, तपस्वियों के धार्मिक कार्यों में व्यवधान नहीं चाहती हैं । यह इनका वंश परम्परागत व्रत है ।

**प्रद्वेषो बहुमानो वा संकल्पादुपजायते ।**

**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥७॥**

**अन्वय-** प्रद्वेषः वा बहुमानः सङ्कल्पात्(एव) उपजायते । भर्तृदारा-अभिलाषित्वात् अस्याम् मे महती स्वता(अस्ति) ।

**अनुवाद-** शत्रुता अथवा आदर संकल्प से(ही) उत्पन्न होते हैं । (इसकारण) स्वामी की पत्नी बनाने की अभिलाषा से इसमें मेरी अत्यधिक आत्मीयता हो रही है ।